सकण्टकः, पु, (कण्टकेन सह वर्त्तमानः ।) शैवालः । इति शब्दचन्द्रिका ॥ करञ्जविशेषः । इति रत्नमाला ॥ नाटाकरञ्ज इति भाषा ॥ कण्टकयुक्ते, त्रि । यथा,—

"शीतलोष्णसमायुक्तसकण्टकदलान्वित ।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥"

इति तिथ्यादितत्त्वम् ॥

( लोमाञ्चिते च त्रि । यथा, कथासरित्सागरे । २५ । २२० ।

"स तं साहसिकस्पर्शभीतैरिव सकण्टकैः ।
अङ्गैः प्रणतमालिङ्ग्य मुमुदे भूपतिश्चिरम् ॥")

सकरः,त्रि,हस्तयुक्तः । राजस्वविशिष्टः । शुण्डयुक्तः । किरणविशिष्टः । करेण सह वर्त्तते योऽसौ । इति बहुव्रीहिसमासनिष्पन्नः ॥

सकरुणः, त्रि, ( करुणया सह वर्त्तमानः । ) करुणायुक्तः । सदयः । यथा,—

"भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वाञ्छन् कथयति भवानि त्वमिति यः ।
तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मुकुन्दब्रह्मेन्द्रस्फुटमुकुटनीराजितपदाम् ॥"

इत्यानन्दलहरी ॥

सकर्णः, त्रि, (कर्णाभ्यां सह वर्त्तमानः ।)श्रवणशीलः । तत्पर्य्यायः । श्रुतितत्परः २ । इति जटाधरः ॥ कर्णयुक्तश्च ॥

सकर्म्मकः, पुं, (कर्म्मणा सह वर्त्तमानः । कप् ।) कर्म्मयुक्तधातुः । कर्म्मान्वयिक्रियार्थकः । यथा । क्वचित् सकर्म्मकाद्धातोर्भावेऽपि क्रियाव्याप्तिरस्ति । यथा । कां दिशं गन्तव्यम् । इति मुग्धबोधटीकायां दुर्गादासः ॥ (कर्म्मयुक्ते, त्रि । यथा, भागवते । ५ । २० । ३२ ।

"तद्वर्णपुरुषा भगवन्तं ब्रह्मरूपिणं सकर्म्मकेण कर्म्मणाराधयन्ति ॥" "सकर्म्मकेण ब्रह्मसालोक्यादिसाधनेन ।" इति तट्टीका ॥)

सकलं, त्रि, (कलया सह वर्त्तमानम् । ) समुदायः । तत्पर्य्यायः । सर्व्वम् २ समम् ३ विश्वम्४ अशेषम् ५ कृत्स्नम् ६ समस्तम् ७ निखिलम्८ अखिलम्८ निःशेषम् १० समग्रम् ११ पूर्णम्१२ अखण्डम् १३ अमूलकम् १४ । इत्यमरः ॥ अनन्तम् १५ । इति शब्दरत्नावली ॥ (यथा, भागवते । ४ । २८ । ४ ।

"दार्भिः प्रविश्य सुभृशं प्रार्दयन् सकलां पुरीम् ॥"

कला प्रकृतिस्तया सह वर्त्तते इति । सगुणम् । यथा महाभारते । १३ । १६ । ८ ।

"निष्कलं सकलं ब्रह्म निर्गुणं गुणगोचरम् ॥")

सकामः, त्रि, ( कामेन सह वर्त्तमान इति । ) कामनाविशिष्टः । यथा,—

"अकामो वा सकामो वा यत्र क्वापि वहिर्जले देह त्यजामुत्र दुःखानि नाप्नुयाद्यो न पश्यति ॥"

इति तिथ्यादितत्त्वम् ॥

सकाशः,पुं,(काशः प्रकाशस्तेन सह वर्त्तते इति ।) समीपः । यथा,—

"देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

काशयुक्ते, त्रि ॥

सकुरुण्डः, पुं, सकुरुण्डवृक्षः । इति राजनिर्घण्टः ॥

सकुलः, पुं, (कुलेन सह वर्त्तते इति ।) शकुलमत्स्यः । इति शब्दरत्नावली ॥

सकुल्यः, त्रि, ( समाने कुले भवः । यत् । ) सगोत्रः । यथा,—

"जारो सङ्गः सगोत्रास्तु स्वजनज्ञातिबान्धवाः ।
सकुल्यबन्धुदायादस्वसमानोदका अपि ॥"

इति जटाधरः ॥ * ॥

स्वावध्युद्धर्तनाष्टमावधिदशमपुरुषपर्य्यन्तपुरुषत्रयम् । तेषां दशमपुरुषपर्य्यन्तसन्ततिः । स्वावध्यधस्तनाष्टमावधिदशमपुरुषपर्य्यन्तसन्ततिश्च । तेषामशौचं यथा, बृहस्पतिः ।

"दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः ॥"

इति शुद्धितत्त्वम् ॥ * ॥

दायाधिकारिसकुल्यास्तु पञ्चमपुरुषावधयः । यथा । बौधायनः । प्रपितामहः पितामहः पिता स्वयं सोदर्य्यभ्रातरः सवर्णायाः पुत्त्रः पौत्त्रः प्रपौत्त्रो वा एतानविभक्तदायादान् सपिण्डान् आचक्षते । विभक्तदायादान् सकुल्यान् आचक्षते सत्स्वङ्गजेषु तद्गामी ह्यर्थो भवतीति । इति दायतत्त्वं शुद्धितत्त्वञ्च ॥*॥ तस्य कन्यादानाधिकारित्वं यथा । विष्णुः । पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः । नारदश्च ।

"पिता दद्यात् स्वयं कन्यां भ्राता वानुमतः पितुः
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा ॥
माता त्वभावे सर्व्वेषां प्रकृतौ यदि वर्त्तते ।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ॥"

इत्युद्वाहतत्त्वम् ॥

सकुली, स्त्री, मत्स्यविशेषः । अस्या गुणादिस्तालव्यशकारादिशकुलशब्दे द्रष्टव्यः ॥

सकृत्, व्य, (एक+"एकस्य सकृच्च ।"५।४।१९। इति सुच् सकृदादेशश्च । संयोगान्त्येति सुचो लोपः ।) एकवारम् । (यथा,—

"सकृदंशो निपतति सकृत् कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत् सकृत् ॥"

इति महाभारतम् ॥)

सह । इत्यमरः ॥ विष्ठा । इति तट्टीका ॥ (अस्मिन्नर्थे तालव्यशकारस्य प्रयोगः प्रायशो दृश्यते ॥)

सकृत्प्रजः, पुं, ( सकृत् प्रजा यस्य । ) काकः । इत्यमरः ॥ जातैकमात्रापत्ये, त्रि ॥

सकृत्फला, स्त्री, ( सकृत् फलानि यस्याः । ) कदली । इति राजनिर्घण्टः ॥

सकृद्गर्भः, पुं, (सकृत् गर्भो यस्य ।) वेसरः । इति राजनिर्घण्टः ॥ एकमात्रगर्भिण्यां, स्त्री ॥

सकृद्वीरः, पुं, (सकृत् वीर इव ।) एकवीरवृक्षः । इति राजनिर्घण्टः ॥

सक्तः, त्रि, ( सन्ज + क्तः । ) अविरतः । इति हेमचन्द्रः ॥ आसक्तः ॥ ( यथा, रामायणे । ६ । ४ । ११९ ।

"अन्योन्यं राहताः सक्ता महानद्योर्मिनिःस्वनाः
ऊर्म्मयः सिन्धुराजस्य महाभेर्य्य इवाहवे ॥")

सक्तिः, स्त्री, सङ्गः । सन्जधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (यथा, किराते । ५ । ४६ ।

"सक्तिं जवादपनयत्यनिले लतानां
वैरोचनैर्द्विगुणिताः सहसा मयूखैः ।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां
भासस्तडिद्विलसितानि विडम्बयन्ति ॥")

सक्तुः, पुं, (सच्यते सिच्यते इति । सच सेचने + "सितनिगमिमसिसचोति ।" उणा० १।७० । इति तुन् । ) भृष्टयवादिचूर्णः । छातु इति भाषा । यथा,—

"भृष्टा यवाः पुनर्धाना धानाचूर्णन्तु सक्तवः ॥"

इति हेमचन्द्रः ॥

अस्य गुणादिः तालव्यादिशक्तुशब्दे द्रष्टव्यः ॥ (यथा, कथासरित्सागरे । ४ । १२२ ।

"एकः शरावः सक्तूनामेकः प्रत्यहमश्नुसः ।
शकटालस्य तत्रान्तः सपुत्त्रस्य न्यधीयत ॥"

अर्द्धर्चादित्वात् क्लीवलिङ्गेऽपि दृश्यते ॥ प्रायशोऽयं शब्दः बहुवचने प्रयुज्यते ॥)

सक्तुकः, पुं, ( सक्तुरिव । कन् । ) विषभेदः । इति हेमचन्द्रः ॥ स्वार्थे के सक्तुश्च ॥

सक्तुफला, स्त्री, ( सक्तव इव फलानि यस्याः । अजादित्वात् टाप् ।) शमीवृक्षः । इत्यमरः ॥

सक्तुफली, स्त्री, ( सक्तव इव फलानि यस्याः । ङीष् ।) शमीवृक्षः । इति शब्दरत्नावली ॥

सक्थि, [न्] क्ली, (सज्यते इति । सन्ज सङ्गे + "असिसञ्जिभ्यां क्थिन् ।" उणा० ३ । १५४ । क्थिन् ।) ऊरुः । इत्यमरः ॥ (यथा, मार्कण्डेये । १८ । ४९ ।

"तृणां पदे स्थिता लक्ष्मीर्निलयं संप्रयच्छति ।
सक्थ्नोश्च संस्थिता वस्त्रं तथा नानाविधं वसु ॥")

शकटावयवविशेषः । इत्युणादिकोषः ॥

सक्षमः, त्रि, क्षमताविशिष्टः । क्षमाविशिष्टः । क्षमेण क्षमया वा सह वर्त्तमानः । इति बहुव्रीहिनिष्पन्नः ॥

सक्षारः, त्रि, लवणयुक्तः । क्षारेण सह वर्त्तमानः । इति बहुव्रीहिसमासनिष्पन्नः ॥ (यथा, सुश्रुते । १ । ४५ ।

"वातघ्नमुष्णं वाप्यं सक्षारं कटुपित्तलम् ॥")

सखा, [इ] पुं,(समानः ख्यायते इति । समान + ख्या + "समाने ख्यः स चोदात्तः ।" उणा० ४ । १३६ । इति इञ् । टिलोपयलोपौ समानस्य सभावश्च ।) सौहार्दयुक्तः । समानः ख्यायते जनैः नाम्नीति डिः मनीषादित्वात्